# श्री दुर्गा अष्टोत्तर शत नाम स्तोत्रम्

दुर्गा शिवा महालक्ष्मी-र्महागौरी च चण्डिका ।
सर्वज्ञा सर्वलोकेशी सर्वकर्मफलप्रदा ॥ 1 ॥

सर्वतीर्थमयी पुण्या देवयोनि-रयोनिजा ।
भूमिजा निर्गुणाऽऽधारशक्ति श्चानीश्वरी तथा ॥ 2 ॥

निर्गुणा निरहङ्कारा सर्वगर्वविमर्दिनी ।
सर्वलोकप्रिया वाणी सर्वविद्याधिदेवता ॥ 3 ॥

पार्वती देवमाता च वनीशा विन्ध्यवासिनी ।
तेजोवती महामाता कोटिसूर्यसमप्रभा ॥ 4 ॥

देवता वह्निरूपा च सतेजा वर्णरूपिणी ।
गुणाश्रया गुणमध्या गुणत्रयविवर्जिता ॥ 5 ॥

कर्मज्ञानप्रदा कान्ता सर्वसंहारकारिणी ।
धर्मज्ञा धर्मनिष्ठा च सर्वकर्मविवर्जिता ॥ 6 ॥

कामाक्षी कामसंहर्त्री कामक्रोधविवर्जिता ।
शाङ्करी शाम्भवी शान्ता चन्द्रसूर्याग्निलोचना ॥ 7 ॥

सुजया जयभूमिष्ठा जाह्नवी जनपूजिता ।
शास्त्री शास्त्रमयी नित्या शुभा चन्द्रार्धमस्तका ॥ 8 ॥

भारती भ्रामरी कल्पा कराली कृष्णपिङ्गला ।
ब्राह्मी नारायणी रौद्री चन्द्रामृतपरिस्रुता ॥ 9 ॥

ज्येष्ठेन्दिरा महामाया जगत्सृष्ट्यधिकारिणी ।
ब्रह्माण्डकोटिसंस्थाना कामिनी कमलालया ॥ 10 ॥

कात्यायनी कलातीता कालसंहारकारिणी ।
योगनिष्ठा योगिगम्या योगिध्येया तपस्विनी ॥ 11 ॥

ज्ञानरूपा निराकारा भक्ताभीष्टफलप्रदा ।
भूतात्मिका भूतमाता भूतेशा भूतधारिणी ॥ 12 ॥

स्वधा नारीमध्यगता षडाधारादिवर्धिनी ।
मोहितांशुभवा शुभ्रा सूक्ष्मा माता निरालसा ॥ 13 ॥

निम्नगा नीलसङ्काशा नित्यानन्दा हरा परा ।
सर्वज्ञानप्रदाऽऽनन्ता सत्या दुर्लभरूपिणी ॥ 14 ॥

सरस्वती सर्वगता सर्वाभीष्टप्रदायिनी ।

इति श्री दुर्गाष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥